शास्त्रीयहिंसायामपि दोषः यथोक्तं सां॰का॰। "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः"। अविशुद्धिर्हिंसादोषसंसर्गः यथा च वैधहिंसायां दोषसंसर्गस्तथोक्तमशुद्धिशब्दे ४७६ पृष्ठे। एतस्याश्च भावरूपत्वं गीतायामुक्तम् "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः। अहिंसा समता तुष्टिः" इत्युपक्रम्य "भवन्ति भावा भूतानां मत्त एव पृथग्विधाः"। इयञ्च साधारणधर्म्मः। "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। एतत् सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः" इति मनूक्तेः "क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः। अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया, आर्जवं ह्रीरलोभश्च देवब्राह्मणपूजनम्। अनभ्यसूया च तथा धर्म्मः सामान्य उच्यते" विष्णूक्तेः "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। दानं शमोदया क्षान्तिः सर्वेषां धर्म्मसाधनमिति" याज्ञ॰उक्तेश्च "सर्वेषां पुरुषाणां ब्राह्मणाद्याचण्डालान्तं धर्म्मसाधनमिति" "साधारणधर्मश्चाहिंसादिः" "न हिंस्यात् सर्वाभूतानीति" श्रुत्युक्तः आचाण्डालान्तं साधारणधर्मः" मिता॰। इयञ्च "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः" पात॰उक्तो यमभेदः, "अहिंसा नाम मनोवाक्कायैः सर्वदा सर्वभूतानामपीड़नं सा परमः शुद्धोधर्मः "अहिंसा परमोधर्म" इत्युक्तेः अन्ये सत्यादय एतस्या एव शुद्ध्यर्थाः तथा चोक्तं "स खल्वयं ब्राह्मणो यथा यथा तानि व्रतानि समादित्सति तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोतीति" वृत्तिः। तस्याश्च कथंकर्त्तव्यता तदपि "वितर्कबाधने प्रतिपक्षभावनम्" पात॰सू॰ दर्शितम् "एतेषां यमनियमानां वितर्कैर्हिंसादिभिः कल्पैः हनिष्याम्यहमेनमसत्यं वदिष्यामि परस्वमादास्ये इत्यादिभिः बाधने प्राप्ते सति यमपरो ब्राह्मणः प्रतिपक्षभावनं कुर्य्यात् घोरेषु संसाराङ्गारेषु पाप्यमानेन येन मया शरणमुपगतः सर्वभूताभयप्रदानेन यमादिधर्म्मः स खल्वहं त्यक्त्वा हिंसादीन् पुनस्तानाददानस्तुल्यः शुना। यथा श्वा वान्ताशी तथा त्यक्तस्य पुनरादाने इति वितर्कप्रतिपक्षान् भावयेदित्यर्थः" वृत्तिः। वितर्काणां स्वरूपप्रकारकारणावान्तरभेदफलानि पञ्चभिः पदैः क्रमेण वदन् प्रतिपक्षभावनं स्फुटयति। "वितर्काः कृतकारितानुमोदिता लोभक्रोधमोहपूर्व्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्" पात॰सू॰। "वितर्क्यन्त इति वितर्काहिंसादयः इति स्वरूपोक्तिः। तत्र हिंसा त्रिप्रकारा स्वयंकृता, कुर्विति कारिता, साधुसाध्विप्यनुमोदिता चेति तत्रैकैका पुनस्त्रिविधा भवति कारणभेदात् मांसादिलोभेन, अपकृतमनेनेति क्रोधेन, धर्मो भविष्यतीति मोहेन च। एवं नवविधा जाता हिंसा। लोभक्रोधमोहा अपि प्रत्येकं त्रिविधा भवन्ति मृदुमध्याधिमात्रत्वेन। तत्पूर्व्वकाहिंसादयोऽपि मृदवोमध्या अधिमात्राश्च भवन्ति। तथा कृतकारितानुमोदिताश्च प्रत्येकं नवधा भवन्तीति हिंसायाः सप्तविंशतिर्भेदा भवन्ति। मृदुमध्याधिमात्रा अपि प्रत्येकं त्रिधा भवन्ति मृदुमृदुर्मध्यमृदुस्तीव्रमृदुः मृदुमध्योमध्यमध्यस्तीव्रमध्यः मृदुतीव्रोमध्यतीव्रस्तीव्रतीव्रश्चेति एवं लोभो नवविधः एवं क्रोधमोहाविति तत्पूर्व्वकृताहिंसा सप्तविंशतिभेदाभवन्ति तथा कारितानुमोदिता चेत्येकाशीतिभेदा हिंसा भवति" वृत्तिः। तेषां फलान्याह दुःखाज्ञानानन्तफला इति। मनुनापि "अनुमन्ता विशसिता नियन्ता क्रयविक्रयी। संस्कर्त्ता चोपहर्त्ता च षड़ेते घातकाः स्मृताः" इत्यनेन अनुमत्यादीनां हिंसासाधनत्वमुक्तम् यमसध्ये ऽहिंसाफलमप्याह पात॰सू॰। "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः"। अहिंसासिद्धौ सत्यां तस्याऽहिंसकस्य सुनिवर्य्यस्य सन्निधौ स्वभावविरुद्धानामपि अहिनकुलादीनां वैरत्यागः अस्याएव प्रभावात्। अतएव कविभिः अहिंसायमप्रभावादेव शान्ताश्रमः "विरोधिसत्त्वोज्झितपूर्व्ववत्सरमित्यादि" वर्ण्यते।

**अहिंसान** त्रि॰ न हिनस्ति हिन्स–शीलार्थे चानश् न॰त॰। हिंसाशीलभिन्ने "शर्म्मण्यहिंसानस्य सश्चिरे" ऋ॰५,६४,२।

**अहिंस्र** त्रि॰ न हिंस्रः। १हिंसाशीलभिन्ने। "अहिंस्रोदमदानाभ्यां जयेत् स्वर्गं तथा व्रतः" मनुः "हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते। यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत्" मनुः। "हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते। ते एव प्रतिपद्यन्ते सृज्यमानाः पुनःपुनः" शा॰भा॰ स्मृतिः। (कुलेखाड़ा) २कुलिकवृक्षे पु॰ राजव॰।

**अहिका** स्त्री अहिरिव कायति प्रकाशते दुराक्रमत्वात्। १शाल्मलिवृक्षे शब्दच॰। २भुवनान्तरे पु॰।

**अहिकान्त** पु॰ अहेः कान्तः भक्ष्यत्वात्। वायौ सर्पस्य पवनाशनत्वेन वायोस्तत्कान्तत्वम्।

**अहिक्षेत्र** पु॰ अहेः क्षेत्रमिव। प्राग्देशवर्त्तिदेशभेदे। भा॰व॰ २५३ अ॰ कर्णदिग्विजये। "अवतीर्य्य ततः शैलात् पूर्व्वां दिशमभिद्रुतः। अङ्गान् वङ्गान् कलिङ्गांश्च" इत्युपक्रम्य